শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - ८६

*सालवादिवधवर्णनं भारतयुद्धवर्णनं च*

सालवो भैष्मीविवाहे यदुबलविजितश्चन्द्रचूडाद्विमानं
विन्दन् सौभं स मायी त्वयि वसति कुरूंस्त्वत्पुरीमभ्यभाङ्क्षीत्।
प्रद्युम्नस्तं निरुन्धन्निखिलयदुभटैर्न्यग्रहीदुग्रवीर्यं
तस्यामात्यं द्युमन्तं व्यजनि च समरः सप्तविंशत्यहान्तः॥ १ ॥

तावत्त्वं रामशाली त्वरितमुपगतः खण्डितप्रायसैन्यं
सौभेशं तं न्यरुन्धाः स च किल गदया शार्ङ्गमभ्रंशयत्ते।
मायातातं व्यहिंसीदपि तव पुरतस्तत्त्वयापि क्षणार्धं
नाज्ञायीत्याहुरेके तदिदमवमतं व्यास एव न्यषेधीत्॥ २ ॥

क्षिप्त्वा सौभं गदाचूर्णितमुदकनिधौ मङ्क्षु सालवेऽपि चक्रे-
णोत्कृत्ते दन्तवक्त्रः प्रसभमभिपतन्नभ्यमुञ्चद्गदां ते।
कौमोदक्या हतोऽसावपि सुकृतनिधिश्चैद्यवत्प्रापदैक्यं
सर्वेषामेष पूर्वं त्वयि धृत मनसां मोक्षणार्थोऽवतारः॥ ३ ॥

त्वय्यायातेऽथ जाते किल कुरुसदसि द्यूतके संयतायाः
क्रन्दन्त्या याज्ञसेन्याः सकरुणमकृथाश्चेलमालामनन्ताम्।
अन्नान्तप्राप्तशर्वांशजमुनिचकितद्रौपदी चिन्तितोऽथ
प्राप्तः शाकान्नमश्नन् मुनिगणमकृथास्तृप्तिमन्तं वनान्ते॥ ४ ॥

युद्धोद्योगेऽथ मन्त्रे मिलति सति वृतः फल्गुनेन त्वमेकः
कौरव्ये दत्तसैन्यः करिपुरमगमो दौत्यकृत् पाण्डवार्थम्।
भीष्मद्रोणादिमान्ये तव खलु वचने धिक्कृते कौरवेण
व्यावृण्वन् विश्वरूपं मुनिसदसि पुरीं क्षोभयित्वागतोऽभूः॥ ५ ॥

www.prapatti.com

জিষ্ণোস্ত্ৱং কৃষ্ণ সূতঃ খলু সমৰমুখে বন্ধুঘাতে দযালুং
খিন্নং তং ৱীক্ষ্য ৱীৰং কিমিদমযি সখে নিত্য একোযমাত্মা।
কো ৱধ্যঃ কোত্ৰ হন্তা তদিহ ৱধভিযং প্ৰোজ্ঝ্য ময্যৰ্পিতাত্মা
ধৰ্ম্যং যুদ্ধং চৰেতি প্ৰকৃতিমনযথা দৰ্শযন্ ৱিশ্বৰূপম্॥ ৬ ॥

ভক্তোত্তংসেথ ভীষ্মে তৱ ধৰণিভৰক্ষেপকৃত্যৈকসক্তে
নিত্যং নিত্যং ৱিভিন্দত্যযুতসমধিকং প্ৰাপ্তসাদে চ পাৰ্থে।
নিশ্শস্ত্ৰত্বপ্ৰতিজ্ঞাং ৱিজহদৰিৱৰং ধাৰযন্ ক্ৰোধশালী-
ৱাধাৱন্ প্ৰাঞ্জলিং তং নতশিৰসমথো ৱীক্ষ্য মোদাদপাগাঃ॥ ৭ ॥

যুদ্ধে দ্ৰোণস্য হস্তিস্থিৰৰণভগদত্তেৰিতং ৱৈষ্ণৱাস্ত্ৰং
ৱক্ষস্যাধত্ত চক্ৰস্থগিতৰৱিমহাঃ প্ৰাৰ্দযতসিন্ধুৰাজম্।
নাগাস্ত্ৰে কৰ্ণমুক্তে ক্ষিতিমৱনমযন্ কেৱলং কৃত্তমৌলিং
তত্ৰে তত্ৰাপি পাৰ্থং কিমিৱ নহি ভৱান্ পাণ্ডৱানামকাৰ্ষীত্॥ ৮ ॥

যুদ্ধাদৌ তীৰ্থগামী স খলু হলধৰো নৈমিশক্ষেত্ৰমৃচ্ছ-
ন্নপ্ৰত্যুত্থাযিসূতক্ষযকৃতথ সুতং ততপদে কল্পযিত্বা।
যজ্ঞঘ্নং বলৱলং পৰ্ৱণি পৰিদলযন্ স্নাততীৰ্থো ৰণান্তে
সম্প্ৰাপ্তো ভীমদুৰ্যোধনৰণমশমং ৱীক্ষ্য যাতঃ পুৰীং তে॥ ৯ ॥

সংসুপ্তদ্ৰৌপদেযক্ষপণহতধিযং দ্ৰৌণিমেত্য ত্বদুক্ত্যা
তন্মুক্তং ব্ৰাহ্মমস্ত্ৰং সমহৃত ৱিজযো মৌলিৰত্নং চ জহ্ৰে।
উচ্ছিত্যৈ পাণ্ডৱানাং পুনৰপি চ ৱিশত্যুত্তৰাগৰ্ভমস্ত্ৰে
ৰক্ষন্নঙ্গুষ্ঠমাত্ৰঃ কিল জঠৰমগাশ্চক্ৰপাণিৰ্ৱিভো ত্বম্॥ ১০ ॥

ধৰ্মৌঘং ধৰ্মসূনোৰভিদধদখিলং ছন্দমৃত্যুসস ভীষ্ম-
স্ত্বাং পশ্যন্ ভক্তিভূম্নৈৱ হি সপদি যযৌ নিষ্কলব্ৰহ্মভূযম্।
সংযাজ্যাথাশ্বমেধৈস্ত্ৰিভিৰতিমহিতৈৰ্ধৰ্মজং পূৰ্ণকামং
সম্প্ৰাপ্তো দ্বাৰকাং ত্বং পৱনপুৰপতে পাহি মাং সৰ্ৱৰোগাত্॥ ১১ ॥

**********